# उत्कलदिवसः (1st April, 2018)



बाबासाहेव डॉ.भीमराव आम्बेडकरमहोदयानां जन्मदिनमुपलक्ष्य सर्वभारतीयस्तरे अप्रैलमासस्य चतुर्दशदिनाङ्के जयन्तीमहोत्सवः परिपाल्यते । एषः महोत्सवः “भीमजयन्ती”, “आम्बेडकरजयन्ती”, “समानतादिवसः”, “ज्ञानदिवसः” इत्यादिभिर्नामभिः प्रचलति । डॉ. आम्बेडकरमहोदयाः आजीवनं मानवाधिकारान्दोलने समानताधिकारार्थं बहुसङ्घर्षमकुर्वन् । तेषां संविधाननिर्माणदक्षतां प्रकाण्ड विद्वत्ताञ्चाक्षिलक्षीकृत्य प्रारब्धोऽयं महोत्सवः १ २ ७ वर्षातीतो भवति । अस्मिन् शैक्षिकवर्षे १४.०४.२०१८ तमे दिनाङ्के विद्यापीठप्राङ्गणे जयन्तीमहोत्सवोऽयं महताऽऽडम्बरेण कुलसचिवानां डॉ.सिहेच्.पि.सत्यनारायणमहोदयानामाध्यक्ष्ये पर्यपाल्यत । महोत्सवेऽस्मिन् तिरुपतिस्थश्रीवेङ्कटेश्वरविश्वविद्यालयस्य राजनीतिविज्ञानविभागस्याचार्याः मुख्यातिथिरूपेण समागत्य डॉ.आम्बेडकरमहोदयानां देशभक्तिमूलककार्यक्रमाणां पुनरालोकनं कृत्वा तदादर्शानुप्राणिताः सर्वेऽपि छात्राः देशस्य जातेः प्रगत्यर्थं सर्वदा यतमानाः स्युरिति प्राबोधयन् । सन्दर्भेऽस्मिन् विद्यापीठीयच्छात्रेषु विविधाः शैक्षिकस्पर्धाश्चालिताः विजेतृणां कृते च पुरस्काराः प्रदत्ताः । तिरुपतिनगरस्य प्रसिद्धः Mimicry Artist विशिष्टसम्मानितातिथिरूपेण समाहूतः स्वीयप्रतिभाकौशलेन सर्वान् प्रामोदयत्तथा च डॉ.आम्बेडकरमहोदयानां जीवनचरित्रस्योपरि विचारान् समुपास्थापयत् । कार्यक्रमस्यास्य निदेशकाः तेलुगुविभागस्याध्यापकाः डॉ.डि.नलन्नामहोदया आसन् । विद्यापीठस्य सर्वेऽप्यध्यापकाः कर्मचारिणः महोत्सवेऽस्मिन् सहर्षं भागमगृह्णन् ।